योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०४५

पञ्चचत्वारिंशः सर्गः ४५

श्रीवसिष्ठ उवाच ।

अत्रेमामवबोधाय विस्मयोल्लासकारिणीम् ।

अपूर्वां चैव संक्षेपाद्राम रम्यां कथां श्रृणु ।। १

योजनानां सहस्राणि विपुलं विमलं स्फुटम् ।

युगैरप्यजरद्रूपमस्ति बिल्वफलं महत् ।। २

अविनाशरसाधारं सुधामधुरसारवत् ।

पुराणमपि बालेन्दुदलमार्दवसुन्दरम् ।। ३

व्यूहमध्यमहामेरुं मन्दराद्रिरिवाचलम् ।

महाकल्पान्तवात्याया अपि वेगैरचालितम् ।। ४

योजनायुतकोटीनां कोटिलक्षशतैरपि ।

वैपुल्येनापरिच्छेद्यं मूलमाद्यं जगत्स्थितेः ।। ५

यस्य बिल्वफलस्योच्चैब्रह्माण्डानि समीपतः ।

हरन्ति लीलां शैलाधो राजिकाकणपद्धतेः ।। ५

स्यन्दमानरसापूरां स्वाद्वीं रसचमत्कृतिम् ।

यस्यातिशेते नो कश्चिदपि राघव षड्रसः ।। ७

न कदाचन पाकेन पातं तेन समेति यत् ।

सदैव पक्वमप्यङ्ग जरसा यन्न बाध्यते ।। ८

ब्रह्मविष्ण्विन्द्ररुद्राद्या जरठाः केचिदेव न ।

यस्योत्पत्तिं विजानन्ति मूलं वा वृन्तमेव च ।। ९

अदृष्टाङ्कुरवृक्षस्य त्वदृष्टकुसुमाकृतेः ।

अस्तम्भमूलशाखस्य फलस्यास्य महाकृतेः ।। १०

एकपिण्डघनाकारविततस्थौल्यशालिनः ।

यस्योत्पत्तिविकारादिपरिणामो न दृश्यते ।। ११

समस्तफलसारस्य फलस्यास्य महाकृतेः ।

न मज्जा नाष्ठि विततो निर्विकारो निरञ्जनः ।। १२

शिलान्तरिव नीरन्ध्रः स्यन्दमानेन्दुबिम्बवत् ।

रसं स्वसंविदास्वाद्यं स्यन्दमान इवामृतम् ।। १३

कोशः सकलसौख्यानां शीतलालोककारकः ।

शैलाभोऽमृतपिण्डाभो मज्जाआत्मफलस्थितेः ।।१४

तस्मात्परममज्जा तु यासौ स्वात्मचमत्कृतिः ।

अनन्तरक्षितो नित्यमनन्यः श्रीफलं गतः ।। १५

स्वसंनिवेशवैचित्र्यमन्यत्वफलतां गताम् ।

अत्यजन्त्या तया तन्व्या स्थूलयाप्यतिबालया ।। १६

इयमस्मीति कलनादसदप्यन्यतामलम् ।

भेदाद्यसंभवदिदं स्वयमुत्पाद्य भावितम् ।। १७

अहंकलासमुदयसमनन्तरमेव सा ।

वलिताकाशशब्दाङ्गत्रैलोक्यपरमाणुभिः ।। १८

इत्यनुक्रमतो याता संविच्छक्तिस्वरूपताम् ।

मज्जा प्राक् संनिवेशं स्वं तमेवाप्य समुज्झती ।। १९

संविच्छक्तया तया तत्र ततस्तरलरूपया ।

निज एव समे रूपे दृगित्थं संप्रसारिता ।। २०

इदं व्योम महानन्तमियं कालमयी कला ।

इयं नियतिरित्युक्ता क्रियेयं स्पन्दरूपिणी ।। २१

अयं संकल्पविस्तारस्त्वयमाशान्तरभ्रमः ।

रागद्वेषस्थितिरियं हेयोपादेयधीरियम् ।। २२

इयं त्वत्ता त्वियं मत्ता तत्तेयं संस्थिता स्वयम् ।

ब्रह्माण्डौघोऽयमूर्ध्वस्थः स्वयमङ्गोर्ध्वमप्यधः ।। २३

अयं पुरः पार्श्वतोऽयं पश्चादाराद्दवीयसी ।

इदं भूतं वर्तमानं भविष्यत्त्विदमित्यपि ।। २४

इदमन्तःस्थितानल्पकल्पनाम्भोरुहालयम् ।

ब्रह्माण्डमण्डपापीडक्रीडामण्डपमण्डलम् ।। २५

अनन्तकलनातत्त्वपरिपल्लविता हरेः ।

हृदब्जकर्णिका चेयं लोकपद्माक्षमालिका ।। २६

इयं कीर्णमहारुद्रगणापूरितकोटरा ।

दीर्घाभ्रसरणिर्भ्रान्तध्वंसनेभ्यः प्रभाविनी ।। २७

इयं मेरुः ककुभ्यत्र जगत्पङ्कजकर्णिका ।

स्फुरदिन्दुमधूल्लासलम्पटामरषट्पदा ।। २८

इयमुद्दामसौगन्ध्यस्वर्गश्रीपुष्पमञ्जरी ।

जगज्जरठवृक्षस्य रजोनरकमूलिनः ।। २९

इयं च ताराकिंजल्का ब्रह्मार्णवतटस्थिता ।

अपारापारपर्यन्ता व्योमलीलासरोजिनी ।। ३०

इयं क्रियापरिग्राहा तरङ्गतरलावली ।

सर्गावर्तविधानस्थभूरिभूतपरम्परा ।। ३१

इयत्तया प्रसरिणी क्षणकल्पादिपल्लवा ।

तेजःकेसरिणी कालनलिनी व्योमपङ्कजा ।। ३२

इमा भावविकाराढ्या जरामृतिविषूचिकाः ।

विद्याविद्याविलासाढ्या इमाः शास्त्रार्थदृष्टयः ।। ३३

इति सा तस्य बिल्वस्य निजमज्जाचमत्कृतिः ।

संकल्पसंनिवेशान्तरेवैव कृतसंस्थितिः ।। ३४

शान्ता स्वस्था निराबाधा सौम्या भावनयोज्झिता ।

कर्तृत्वमप्यकर्तृत्वं कृत्वाऽकृत्वेव संस्थिता ।। ३५

एषैकिकैव विविधेव विभाव्यमाना

नैकात्मिका न विविधा ननु सैव सैव ।

सत्यास्थिता सकलशान्तिसमैकरूपा

सर्वात्मिकातिमहती चितिरूपशक्तिः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० बिल्वोपाख्याने पञ्चचत्वारिंशः

सर्गः ।। ४५ ।।